# রেণুকাস্তোত্রং মুচুকুন্দকৃতম্

{॥ রেণুকাস্তোত্রং মুচুকুন্দকৃতম্ ॥}

শ্রীগণেশায নমঃ ।

মুচুকুন্দ উবাচ

অনাথমকৃতপ্রজ্ঞং অজ্ঞানতিমিরাবৃতম্ ।

মোহপঙ্কনিমগ্নঞ্চ মামুদ্ধর সুরেশ্বরি ॥

ত্বাং রেণুকেতি বরদেতি চ সুন্দরীতি

বাগীশ্বরীতি সকলেতি চ পার্বতীতি ।

সিদ্ধেশ্বরীতি সুভগেতি চ যে বদন্তি

তান্ দেবি নিত্যমনধান্ পরিপালয ত্বম্ ॥

অম্বেতি বিশ্বজননীতি জগদ্ধিতেতি

বিদ্যেতি ধর্মনিরতেতি পরাৎপরেতি ।

আদ্যেতি বেদজননীতি চ যে বদন্তি

তান্ দেবি নিত্যমনধান্ পরিপালয ত্বম্ ॥

ত্বাং বেদশাস্ত্রমিতিহাসবিনোদিনীতি

ব্রহ্মেতি ব্রহ্মগমকেতি শুভাবহেতি ।

বিশ্বেশ্বরীতি কমলেতি চ যে বদন্তি

তান্ দেবি নিত্যমনধান্ পরিপালয ত্বম্ ॥

Stotram Digitalized By Sanskritdocuments.org

আনন্দভূতনিলযেত্যনলোদ্ভবেতি
গূঢেতি ভাবগমকেতি শুভাবহেতি ।
বিশ্বেশ্বরীতি কমলেতি চ যে বদন্তি
তান্ দেবি নিত্যমনধান্ পরিপালয ত্বম্ ॥

নিত্যেতি দিব্যচরণেতি মহাব্রতেতি
হৃদ্যেতি ভক্তজনদুঃখবিনাশিনীতি ।
শ্রদ্ধেতি রামজননীতি চ যে বদন্তি
তান্ দেবি নিত্যমনধান্ পরিপালয ত্বম্ ॥

ত্বাং পুণ্যদেতি জমদগ্নি-ঋষিপ্রিযেতি
গঙ্গেতি তত্ত্ববিহিতেতি পরাপরেতি ।
সুদ্ধেতি পাতককদম্বকুঠারকেতি
তান্ দেবি নিত্যমনধান্ পরিপালয ত্বম্ ॥

ত্বাং রাজনীতি পরমামৃতভোজনেতি
শৃঙ্গারমুখ্যনবষট্ চ রসপ্রিযেতি ।
লক্ষ্মীপ্রদেতি সুমুখেতি চ যে বদন্তি
তান্ দেবি নিত্যমনধান্ পরিপালয ত্বম্ ॥

স্কন্দ উবাচ
স্তুত্বৈবং মুচুকুন্দেন রেণুকা ব্রহ্মরূপিণী ।

প্রত্যক্ষরূপা প্রাহেদং প্রসন্নাহং মুনীশ্বর ॥

দেব্যুবাচ

মুচুকুন্দ ত্বয়া তুল্যঃ কশ্চিদ্ভক্তো ন বিদ্যতে ।

কিং প্রার্থযসি মত্তস্ত্বং ব্রূহি যত্তেঽভিবাঞ্ছিতম্ ॥

মুচুকুন্দ উবাচ

ত্বদ্ভক্তিমতুলাং দেহি দেবি ত্বং বিশ্বরূপিণী ।

নান্যদিচ্ছাম্যহং মাতঃ সত্যমেতন্ময়োদিতম্ ॥

আত্মনঃ স্বং পরং ব্রহ্মস্বরূপং দর্শযস্ব মে ।

যদি তুষ্টাসি দাসস্য কৃপয়া ত্বং মমোপরি ॥

ইতি শ্রীস্কন্দমহাপুরাণে রেণুকামাহাত্ম্যে

শ্রীরেণুকাস্তোত্রং মুচুকুন্দকৃতম্ ॥

Encoded by Kaushal S. Kaloo kaushalskaloo at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Renuka Stotram 5 ( By Muchukunda ) Lyrics in Bengali PDF
% File name : reNukAstotrammuchukubdaskanda.itx
% Location : doc_devii
% Author : Vinayaka Shastri Vetala
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com
% Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com
% Description-comments : Skandapurana Runukakhanda
% Latest update : June 13, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website